लक्ष्मीः
लक्ष्मीः

सा च देवी द्विधा भूता सहसैवेश्वरेच्छया।
समा रूपेण वर्णेन तेजसा वयसा त्विषा।
यशसा वाससा मूर्त्त्या भूषणेन गुणेन च॥
स्मितेन वीक्षितेनैव वचसा गमनेन च।
मधुरेण स्वरेणैव नयेनानुनयेन च॥
तद्वामांशो महालक्ष्मीर्दक्षिणांशश्च राधिका।
राधादौ वरयामास द्विभुजञ्च परात्परम्॥
महालक्ष्मीश्च तत्पश्चाच्चकमे कमनीयकम्।
कृष्णस्तङ्गौरवेणैव द्विधारूपो बभूव ह॥
दक्षिणांशश्च द्विभुजो वामांशश्च चतुर्भुजः।
चतुर्भुजाय द्विभुजो महालक्ष्मीं ददौ पुरा।
लक्ष्यते दृश्यते विश्वं स्निग्धदृष्ट्या ययानिशम्।
देवीषु या च महती महालक्ष्मीश्च सा स्मृता॥
द्विभुजो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः।
शुद्धसत्त्वस्वरूपैश्च गोपैर्गोपीभिरावृतः॥
चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह।
सर्व्वांशेन समौ द्वौ तौ कृष्णनारायणौ परौ॥
महालक्ष्मीश्च योगेन नानारूपा बभूव सा।
वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा रमा॥
शुद्धसत्त्वस्वरूपा च सर्व्वसौभाग्यसंयुता।
प्रेम्णा सा च प्रधाना च सर्व्वासु रमणीषु च॥
स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी।
पातालेषु च मर्त्त्येषु राजलक्ष्मीश्च राजसु॥
गृहलक्ष्मीर्गृहेष्वेव गृहिणी च कलांशया।
सम्पत्स्वरूपा गृहिणां सर्व्वमङ्गलमङ्गला॥
गवां प्रसूः सा सुरभी दक्षिणा यज्ञकामिनी।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च॥
शोभास्वरूपा चन्द्रे च सूर्य्यमण्डलमण्डिता।
विभूषणेषु रत्नेषु फलेषु च जलेषु च॥
नृपेषु नृपपत्नीषु दिव्यस्त्रीषु गृहेषु च।
सर्व्वशस्येषु वस्त्रेषु स्थानेषु संस्कृतेषु च॥
प्रतिमासु च देवानां मङ्गलेषु घटेषु च।
माणिक्येषु च मुक्तासु माल्येषु च मनोहरा॥
मणीन्द्रेषु च हीरेषु क्षीरेषु चन्दनेषु च।
वृक्षशाखासु रम्यासु नवमेघेषु वस्तुषु॥
वैकुण्ठे पूजिता सादौ देवी नारायणेन च।
द्वितीये ब्रह्मणा भक्त्या तृतीये शङ्करेण च॥
विष्णुना पूजिता सा च क्षीरोदे भारते मुने!।
स्वायम्भुवेन मनुना मानवेन्द्रैश्च सर्व्वतः॥
ऋषीन्द्रैश्च मुनीन्द्रैश्च सद्भिश्च गृहिभिर्भवे।
गन्धर्व्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता॥
शुक्लाष्टम्यां भाद्रपदे कृता पूजा च ब्रह्मणा।
भक्त्या च पक्षपर्य्यन्तं त्रिषु लोकेषु नारद!॥
चैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे।
विष्णुना निर्म्मिता पूजा त्रिषु लोकेषु भक्तितः॥
वर्षान्ते पौषसंक्रान्त्यां मेध्यामावाह्य प्राङ्गणे।
मनुस्तां पूजयामास सा भूता भुवनत्रये॥
राजेन्द्रेण पूजिता सा मङ्गलेनैव मङ्गला।
केदारेणैव नीलेन नलेन सुबलेन च॥
ध्रुवेणोत्तानपादेन शक्रेण बलिना तथा।
कश्यपेन च दक्षेण कर्द्दमेन विवस्वता॥
प्रियव्रतेन चन्द्रेण कुवेरेणैव वायुना।
यमेन वह्निना चैव वरुणेनैव पूजिता॥
एवं सर्व्वत्र सर्व्वैश्च वन्दिता पूजिता सदा।
सर्व्वैश्वर्य्याधिदेवी सा सर्व्वसम्पत्स्वरूपिणी॥"
अपि च।

नारद उवाच।

"नारायणप्रिया सा च वरा वैकुण्ठवासिनी।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी॥
कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका।
किं तद्ध्यानञ्च स्तवनं सर्व्वः पूजाविधिक्रमः।
पुरा केन स्तुतादौ सा तन्मां व्याख्यातुमर्हसि॥

श्रीनारायण उवाच।

पुरा दुर्व्वाससः शापात् भ्रष्टश्रीश्च पुरन्दरः।
बभूव देवसंघश्च मर्त्त्यलोकश्च नारद!॥
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता।
गत्वा लीना च वैकुण्ठे महालक्ष्म्याञ्च नारद॥
तदा शोकाद्ययुर्देवा दुःखिता ब्रह्मणः सभाम्।
ब्रह्माणञ्च पुरस्कृत्य ययुर्वैकुण्ठमेव च॥
वैकुण्ठे शरणापन्ना देवा नारायणे परे।
अतीवदैन्ययुक्ताश्च शुष्ककण्ठौष्ठतालुकाः॥
तदा लक्ष्मीश्च कलया पुरा नारायणाज्ञया।
बभूव सिन्धुकन्या सा शक्रसम्पत्स्वरूपिणी॥
तदा मथित्वा क्षीरोदं देवा दैत्यगणैः सह।
संप्रापुश्च वरं लक्ष्म्या दृष्टमुक्ताश्च तत्र हि॥
सुरादिभ्यो वरं दत्त्वा वरमालाञ्च विष्णवे।
ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने॥
देवाश्चाप्यसुरग्रस्तं राज्यं प्रापुश्च तद्वरात्।
तां सम्पूज्य च सम्भूय सर्व्वत्र च निरापदः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३५।३६ अध्यायौ।
लक्ष्म्या अगम्यगृहाणि यथा,—
"यं यं रुष्टो गुरुर्द्देवो माता तातश्च बान्धवः।
अतिथिः पितृलोकाश्च न यामि तस्य मन्दिरम्॥
मिथ्यावादी च यः शश्वदनध्यायी च यः सदा।
सत्त्वहीनश्च दुःशीलो न गेहं तस्य याम्यहम्।
सत्यहीनः स्थाप्यहारी मिथ्यासाक्ष्यप्रदायकः।
विश्वासघ्नः कृतघ्नो यो न यामि तस्य मन्दिरम्॥
चिन्ताग्रस्तो भयग्रस्तः शत्रुग्रस्तोऽतिपातकी।
ऋणग्रस्तोऽतिकृपणो न गेहं यामि पापिनाम्॥
दीक्षाहीनश्च शोकार्त्तो मन्दधीः स्त्रीजितः सदा।
पुंश्चलीपतिपुत्त्रौ यौ तद्गेहं नैव याम्यहम्।
पुंश्चल्यन्नञ्चावीरान्नं यो भुङ्क्ते कामतः सदा।
शूद्रान्नभोजी तद्याजी तद्गेहं नैव याम्यहम्।
यो दुर्व्वाक् कलहाविष्टः कलिः शश्वदालये।
स्त्री प्रधाना गृहे यस्य न यामि तस्य मन्दिरम्॥
यत्र नास्ति हरेः पूजा तदीयगुणकीर्त्तनम्।
नोत्सुकश्च प्रशंसायां न यामि तस्य मन्दिरम्।
कन्यान्नवेदविक्रेता नरघाती च हिंसकः।
नरकागारसदृशं न यामि तस्य मन्दिरम्॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं सुरस्य च।
यो हरेद्दानहीनश्च न यामि तस्य मन्दिरम्॥
यत् कर्म्म दक्षिणाहीनं मूढधीः कुरुते शठः।
स पापी पुण्यहीनश्च न यामि तस्य मन्दिरम्॥
मातरं पितरं भार्य्यां गुरुपत्नीं गुरुञ्च तम्।
अनाथां भगिनीं कन्यामनन्याश्रयबान्धवान्॥
कार्पण्याद्यो न पुष्णाति सञ्चयं कुरुते सदा।
तद्गृहान्नरकाकारान्न यामि तान्मुनीश्वराः॥
मूत्रं पुरीषमुत्सृज्य यस्तत् पश्यति मन्दधीः।
यः शेते स्निग्धपादेन न यामि तस्य मन्दिरम्॥
अधौतपादशायी यो नग्नः शेतेऽतिनिद्रितः।
सन्ध्याशायी दिवाशायी न यामि तस्य मन्दिरम्॥
मूर्ध्नि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत्।
ददाति चाङ्गगात्रे वा न यामि तस्य मन्दिरम्॥
दत्त्वा तैलं मूर्द्ध्नि गात्रे विण्मूत्रं यः समुत्सृजेत्।
प्रणमेदाहरेत् पुष्पं न यामि तस्य मन्दिरम्॥
तृणं छिनत्ति नखरैर्नखरैर्व्विलिखेन्महीम्।
गात्रे पादे मलं यस्य न यामि तस्य मन्दिरम्॥
दशनं वसनं यस्य समलं रूक्षमस्तकम्।
विकृतौ ग्रासहासौ च न यामि तस्य मन्दिरम्॥
मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सकः।
सूपकृद्देवलश्चैव न यामि तस्य मन्दिरम्॥
विवाहं धर्म्मकार्य्यं वा यो निहन्ति च कोपतः।
दिवामैथुनकारी यो न यामि तस्य मन्दिरम्॥"
इत्यादि ब्रह्मवैवर्त्ते गणेशखण्डे लक्ष्मीचरित्रं नाम २३ अध्यायः॥ *॥ अपि च।

"कुचैलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम्।
सूर्य्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम्॥

नित्यं छेदस्तृणानां धरणिविलिखनं पादयोरल्पमार्ष्टि-
र्दन्तानामल्पशौचं वसनमलिनता रूक्षता मूर्द्धजानाम्।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासातिरेकः
स्वाङ्गे पीठे च वाद्यं निधनमुपनयेत् केशवस्यापि लक्ष्मीम्॥

शिरः सुधौतं चरणौ सुमार्ज्जितौ
वराङ्गनासेवनमल्पभोजनम्।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट्॥

यस्य कस्य तु पुष्पस्य पाण्डरस्य विशेषतः।
शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते॥
दीपस्य पश्चिमा च्छाया छाया शय्यासनस्य च।
रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति॥"
इत्यादि गारुड़े ११४ अध्यायः॥ *॥
अङ्गविशेषे तस्याः स्थितिफलं यथा,—

देवा ऊचुः।

"कथयस्व जगन्नाथ! केषु स्थानेष्ववस्थिता।
पुरुषाणां फलं किं वा प्रयच्छत्यथ नश्यति॥